अङ्कः अप्रिल - जून २०२२
उन्मेषः - ८३
Edition: April - June 2022
Volume - 83

साहित्य अकादेमी

# संस्कृतप्रतिभा

# पुनरायाहि

श्री माधवगोपाल

आसीः प्रागपि जन्मनस्त्वं, भाव्यं त्वयाऽनुदेहान्तमपि
अनयोर्मध्ये आसीः केशव! अस्मज्जगन्मण्डले।
त्वदीयं स्थूलशरीरन्तु अग्निदेवेन समाहितम्
सूक्ष्मशरीरस्य स्वामी त्वमधुनापीति न संशयः।
जानामि त्वां प्रेतरूपेण भविष्यसि कुत्रचित् साम्प्रतम्,
भूतानामथ च प्रेतानां नवनायकः स्याः अचिरेण त्वम्।
सुखदासीदिह सङ्गतिस्तव, वार्ता सुखकरी च
चित्ताह्लादकमासीत् किल विनोदवृत्तं तावकम्।
हा! एकमेव दुःखकरं जातम्
यत्तव परलोकगमनम्!
परलोकगमनम्? मैवम्।
अत्रैव कुत्रचिद् भविष्यसि त्वम्,
कयाचित् प्रेतया साकं रममाणः स्यास्त्वम्
उत वा कासुचिद् राजनैतिकचर्चासूपविशन् स्याः भूतवरैः सह
प्रेतकल्याणभावेन वा भविष्यसि कस्याञ्चित् प्रेतगोष्ठ्याम्।
आच्छादकमुपरि कृत्वा नैव स्वप्स्यसीत्यनुमिनोम्यहम्।
समाधिं कदा कलयिष्यसीत्यचिरं ब्रूहि त्वम्,
समष्टिव्यवस्थानुसारेण भविष्यसि पुनर्मानवो यदा?
परोपकारकर्म तव सहजः स्वभावः

आध्यात्मिकचर्चा रोचते स्म तुभ्यम्
समाजसेवासुरभिसुवासितमासीत् तव हृदयं सुकोमलम्
स्वमित्राणां कृते त्वं रणछोड़दासछांछण आसीः मित्र!
सुहृदः तव अनाथाः जाताः वीतविनोदगाथाः।
पुनरायाहि मित्र! इह त्वामिति कामना सर्वथा वृथा।
हर्षितं भूयान्मनस्तव इत्यसकृज्जपन्ति सर्वे।
आगामिनि जन्मनि मेलनं तव भविष्यतीति विश्वसिम्यहम्।।